# B.A 4th Semester (Honours) Examination, 2021

## SANSKRIT

## Paper – AHSNS405SEC-2

## (Spoken Sanskrit and Writing Skill Enhancement in Sanskrit)

## Course ID - 40915

**Time - 2 Hours.** **Full Marks- 40**

**1. परिनिष्ठितरूपं विलिख्य यथेच्छं पञ्चकेन वाक्यं विरच्यताम् ।** **2 X 5 = 10**

क) पठ्धातोः क्तप्रत्यये पुंलिङ्गे प्रथमैकवचने

ख) प्र-नम् धातोः ल्यप्-प्रत्यययोगे

ग) सेव्-धातोः शानच्-प्रत्यये पुंलिङ्गे प्रथमैकवचने

घ) वीणा पाणौ यस्याः सा इत्यस्य समासे

ङ) गम्-धातोः क्तवतुप्रत्यये पुंलिङ्गे प्रथमैकवचने

च) पद्मं नाभौ यस्य सः इत्यस्य समासे

छ) माता च पिता च इत्यस्य समासे

**2. यथेच्छं प्रश्नचतुष्टयं समाधेयम् ।** **5 X 4 = 20**

क) यथेच्छं पञ्चानां पदानां सविग्रहः समासः निर्णेयः ।

निर्मक्षिकम् , यथाशक्ति , राजपुरुषः , घनश्यामः , सिंहासनम् , अहिनकुलम् , शिवकेशवौ ।

ख) अधोलिखितेषु यथेच्छं पञ्चकस्य व्युत्पत्तिर्निर्णेया ।

दर्शनीयः , वर्धमानः , पठितवान् , पक्वः , गत्वा , परित्यज्य , कर्तुम् ।

ग)  यथेच्छं पञ्चकस्य परिनिष्ठितरूपं लिख्यताम्।

दा + तव्य , कृ + ण्यत् ,  गम् + शतृ , खाद् + क्तवतु , नम् + क्त्वा , आ-गम् + ल्यप् , दा + तुमुन्।

घ) अवकाशलाभाय महाविद्यालयाध्यक्षं प्रति आवेदनपत्रं लिख्यताम्।

ङ) गृहे लक्ष्मीपूजामुपलक्ष्य मित्रं प्रति आमन्त्रणपत्रमेकं लिख्यताम्।

च)  रवीन्द्रजन्मोत्सवमुपलक्ष्य रवीन्द्रजन्मदिवसपालनार्थम् एका विज्ञप्तिः लेख्या।

छ)  अधोलिखितस्य गद्यांशस्य सारांशो लेख्यः।

अस्ति कस्यचित् सरोवरस्य तीरे महान् पिप्पलवृक्षः। तस्य शाखासु पक्षिणो वसन्ति , तस्य फलानि च खादन्ति। एकदा केचिद् वानरास्तत्रागताः। तदैव महती वृष्टिरभवत्। ततो वानरान् तरुतले शीतार्तान् कम्पमानान् विलोक्य पक्षिभिरुक्तम् – " भो भो वानराः !  वयं चञ्च्वा तृणानि आहृत्य नीड़ान् रचयित्वा सुखे वसामः। हस्तपदादियुक्ता अपि यूयं किमेवम् अवसीदथ ? " तदाकर्ण्य वानरैर्जातामर्षैरालोचितम् – "अहो नीड़ेषु सुखेन स्थिताः पक्षिणः अस्मान् निन्दन्ति। तद् भवतु तावद् वृष्टेरुपशामः।" अथ शान्ते पानीयवर्षे तैर्वानरैर्वृक्षमारुह्य सर्वे नीड़ा भग्नाः, तेषामण्डानि च अधः पतितानि।

**3)    यथेच्छं विषयमेकमवलम्ब्य एको निबन्धो रचनीयः।                                   10 X 1 = 10**

महाकविः कालिदासः , शारदोत्सवः , संस्कृतस्य महत्त्वम्।